भिस्तु शूद्रः स्पृष्टाभिरन्तत" इति मनुः। "शुध्येत स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्तत" इति या०। सप्तम्यर्थे "सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्तत" इति मनुः। "अन्ततः उपस्पृश्य शुचिरिति गोभि०। अन्ततः अन्तावच्छेदे इत्यर्थः 'तामन्ततोऽपक्रम्येत्यादौ तु पञ्चम्यर्थे। अपेक्षायां, सम्भावनायाञ्च। अवयवे, शासने च विश्व०।

**अन्तम** त्रि० अन्तिक+तमप् "तादेश्चेति" वेदे तिकशब्दलोपः। अन्तिकतमे अत्यन्तनिकटस्थिते। शिक्षा अन्तमस्येति ऋ० १,२७,५, "तनूपा अन्तमो भवेति" ऋ० ६,४६,१०, । भाष्यकृतोक्तार्थतयैव व्याख्यातम्।

**अन्तपाल** त्रि०पु० अन्तं समीपदेशं द्वारं पालयति। द्वारपाले। "शुद्धमुखन्तपालेभ्यः श्रुत्वा लिखितमागतमिति" भा०शा०प०।

**अन्तर्** अव्य० अम–अरन् तुडागमश्च। मध्ये, "अन्तःशाक्ता वहिःशैवाः सभायां वैष्णवा मता" इति तन्त्रम्। 'अन्तर्विश्वानि भेषजा" ऋ० १,२३,२० "अप्स्वन्तरमृतमप्सु" इति ऋ० १,२३,१९, "न प्रस्रुणि गतान्यास्यान्न दन्तान्तरधिष्ठितमिति" मनुः "प्रतिबलजलधेरन्तरौर्वायमाण" इति "अन्तर्ज्वालावलीढेति" च वेणी०। सर्व्वमध्यस्थे परमेश्वरे देहमध्यस्थे जीवे च अन्तःप्रज्ञः अन्तर्ज्योतिरित्यादि। चित्ते "अन्तर्गता मदनवह्निशिखावली येत्युद्भटः "अन्तर्गतं प्राणभृतां हि वेदेति" रघुः। प्राप्ते, स्वीकारे च। अस्य च मध्यार्थेऽव्ययीभावः। अन्तर्जलधि अन्तर्गृहमित्यादि अव्य०।

**अन्तर** न० अन्तं राति ददाति रा–क। अवकाशे, अवधौ, परिधानांशुके अन्तर्द्धाने, भेदे, परस्परवैलक्षण्यरूपे विशेषे, तादर्थ्ये, छिद्रे, आत्मीये, विनार्थे, वहिरर्थे, व्यवधाने, मध्ये, सदृशे च। आसन्ने त्रि०। "कृष्वायुजश्चिदन्तरम् ऋ० १,१०,९, अन्तरं कृष्व आसन्नं कुरु" भा० 'पायुरन्तरो निषङ्गाय" ऋ० १,२१,१२, 'अन्तरः समीपवर्त्तीति" भा० "न यत्परो नान्तर इति" ऋ० २,४१,८, 'अन्तरः समीपवर्त्तीति" भा० निकटस्थे 'यत्नोह्नीलो वो अन्तर इति" ८,१८,१९, अन्तरः अन्तिके वर्त्तमान इति भा०। अन्तरयति दूरीकरोति अन्तर–णिच्+अच्। अपसारणे। अन्तर्गते त्रि०। "हृदो अस्त्वन्तरम्" ऋ० ७,१०१,५ 'अन्तरमन्तर्गतमिति" भा०। इ०उप० अन्तर्यामिब्राह्मणे अन्तर्गते बहुशः प्रयुक्तः तच्च (१२०) पृष्ठे दृश्यम्। "यो अन्तरोमित्रमहो वनुष्यात् ऋ० ६,५,४, अन्तरः अभ्यन्तरवर्त्तीति भा०। "पुरोहितोऽन्तरोयासिदूत्यम् ऋ० १,४४,१२, "अन्तरः देवयजनमध्ये वर्त्तमान" इति भा०। अवकाशे, "मृणालसूत्रान्तरमप्यलभ्यम्" कुमा०। "तत्रान्तरे जघ्नुरमुं कटाक्षैः" माघः। मध्ये, "दिलीपसूनोः स बृहद्भुजान्तरमिति" रघुः। "आवयोरन्तरे जाताः पर्वताः सरितो द्रुमा" इति रामा०। व्यवधाने गिरिर्वा व्यवधायकः। 'महानद्यन्तरं यत्र तद्देशान्तरमुच्यते इ०मनुः। "निरन्तराभ्यन्तरवातवृष्टिषु" कुमा० निरन्तरमव्यवधानम् इत्यर्थः। 'एकान्तरे आनुलोम्यादिति" मनुः। भेदे 'सैव विशिनष्टि पुनःप्रधानपुरुषान्तरं सूक्ष्ममिति" सा०का०। 'शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरमिति" हितो०। 'यदन्तरं सर्षपशैलराजयोर्यदन्तरं वायसवैनतेययोरिति" रामा०। व्यसने। "प्रहरेदन्तरे रिपुम्"। वहिर्योगे 'अन्तरे च पुरात् चाण्डालावासा" इति। उपसंव्याने (उत्तरीयवस्त्रे,) अन्तरं परिदधाति। सदृशे, "स्थानेऽन्तरतम" इति पा० अन्तरशब्दस्य पुरीभिन्ने एव विशेष्ये सर्वनामकार्य्यम् "सुमेधसामन्तरस्मै" इति सि०कौ०, सु०बो०। पुर्य्यान्तु न, अन्तरायै नगर्य्यै। तत्रापि वहिर्योगे उपसंव्याने एव सर्वनामता। मयूरव्यंसादित्वात् नञादेशान्तरशब्दस्य स्वजातीयभिन्ने वृत्तिः शब्दस्याभावात् "राजान्तरं राजसुतां निनायेति" रघुः। अन्यो राजा मयू० "राजान्तरमिति" मल्लिना० "देशान्तरगते पत्यौ साध्वी तत्पादुकाद्वयमिति" स्मृतिः "त्वमेव मूर्त्त्यन्तरमष्टमूर्त्तिरिति "अर्थोऽयमर्थान्तरभाव्य एव" इति च कुमा०। अन्तरस्य भावः ब्राह्मा० ष्यञ्। आन्तर्य्यं सादृश्ये न० "यत्रानेकविधमान्तर्य्यं तत्र स्थानत आन्तर्य्यं बलीय" इति परि०सि० कौ०। अन्तरे भवः अण् आन्तरः तद्भवे त्रि०। 'कश्चन आन्तरो भाव इति" सा०द०। "अन्तःकरणमान्तरमिति" वेदा० व्यवकलने (वियोजने) "कुर्य्याद् यथा स्थाननकमन्तरं वेति" लीला०।

**अन्तरग्नि** पु० अन्तर्वर्त्ती अग्निः। जठरानले "दीप्तान्तरग्निः परिशुद्धकोष्ठ" इति "शाम्यन्ति चायं चिरमन्तरग्नेरिति" 'इच्छाभिघातभयशोकहतेऽन्तरग्नौ" इति च सुश्रुतम्। अग्नेर्मध्ये अव्य०। अग्निमध्ये अव्य०।

**अन्तरङ्ग** पु० अन्तरं सदृशमङ्गं यस्य। अत्यन्तप्रिये, 'समीपगोऽन्तरङ्गःप्रियो भवतीति" का०उप०भा०। "चरमगिरिकुरङ्गीशृङ्गकण्डूयनेन स्वपिति सुखमिदानीमन्तरङ्गः